# M.A. (Part-II) Examination

## SANSKRIT

## Paper—IV

## (Sarvasadharan)

Time : Three Hours] [Maximum Marks : 100

**सूचना :**— अन्यथा निर्देशाभावे उत्तराणि स्वीकृत भाषयैव लिखत।

1. अधोलिखितेषु कमपि **एकतमं** विषयमधिकृत्य संस्कृतभाषया समुचितविस्तरं निबंध लिखत : 20

(I) भारतीयशिक्षापद्धतौ अपेक्षिताः परिस्काराः।

(II) नास्ति चिन्तासमो व्याधिः।

(III) उपमा कालिदासस्य।

(IV) माघे सन्ति त्रयोगुणाः।

(V) भारतीयानां भाषाविज्ञाने योगदानम्।

2. अधोलिखितेषु विषयेषु **एकतमं** विषयमधिकृत्य संस्कृतभाषया पत्रलेखनं कुरुत : 10

(I) महाविद्यालये प्रवेशार्थन् आवेदनपत्रं लिखतं।

(II) नववर्षस्य शुभेच्छा दत्वा प्रियमित्राय पत्रं लिखत।

(III) विरामग्रहणाय अभ्यर्थनपत्रं लिखत।

(IV) प्रियमित्राय अभिनन्दनसूचकपत्रं लिखत।

3. (अ) अधोलिखितस्य गद्यांशस्य अनुवादं कुरुत : 10

एकदा मार्गे गच्छता मया श्रुतम्। 'कथं नु वसन्त, अस्माकं कार्यालयशुकस्तु रम्भापञ्जरमुक्तः इव विभाति। मन्ये अन्यः कश्चित्तया गवेषितः'। एवं च मां दृष्ट्वा उच्चैर्हसन्तः ते स्वाभिलषितां दिशं याताः। ज्वलितमिव चेतसा। अहं तु तच्छ्रवणेन चित्रलिखित इव स्थितः। मनसा चिन्तितं, कर्तव्या खलु पृच्छा तस्याः समीपे। परं न कोपः तस्मै विचाराय अवकाशं प्रायच्छत्।

**अथवा**

युवकः अनन्तः पितुराज्ञां मानयित्वा संप्राप्तः नगरम्। वाणिज्य-महाविद्यालये प्रवेशः लब्धः। तरुणाः वयस्याः मिलिताः। जयन्तः, दुष्यन्तः, धनञ्जयः इति नाना सरबायः। तेषु जयन्तः हास्यचतुरः, दुष्यन्तः क्रीडारसिकः धनञ्जयः तु गानप्रियः अभवत्। सर्वे अपि प्रियंवदाः। तेषां सहवासे दिवसाः विविधैः यौवनेसुलभैः प्रमोदैः अलक्षितोत्पतनाः शकुन्तका इव अनश्यन्। आसीत् परीक्षाकालः। परं कः चिन्तयति।

(ब) अधोलिखितेषु **द्वयोः** पद्ययोः अनुवादं कुरुत : 10

(I) येषां न विद्या न तपो न दानं
ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभुताः
मनुष्यरूपेण मृगाश्चरन्ति।

(II) तानीन्द्रियाणि सकलानि तदेव कर्म

सा बुद्धिरप्रतिहता वचनं तदेव।

अर्थोष्मणा विरहितः पुरुषः स एव

त्वन्यः क्षणेन भवतीति विचित्रमेतत्।।

(III) विपदि धैर्यमथाभ्युदये क्षमा

सदसि वाक्पटुता युधि विक्रमः।

यशसि चाभिरुचिर्व्यसनं श्रुतौ

प्रकृतिसिद्धमिदं हि महात्मनाम्।।

(IV) भवन्ति नम्रास्तरवः फलोद्गमैः-

र्नवाम्बुभिर्भूरिविलम्बिनो घनाः।

अनुद्धताः सत्पुरुषाः समृद्धिभिः

स्वभाव एवैष परोपकारिणाम्।।

4. (अ) अधोलिखितेषु कमप्येकं विषयमधिकृत्य यथोचितं विस्तरं वर्णयत : 15

(I) कथासाहित्यम्

(II) चम्पूकाव्यानि

(III) कालिदासस्य साहित्यकृतिः।

(ब) अधोलिखितेषु विषयद्वयमधिकृत्य टिप्पणी लिखत : 10

(I) पञ्चतन्त्रम्

(II) विशाखदत्तः

(III) आर्यासप्तशती

(IV) माघः।

5. (अ) अधोलिखितेषु कमप्येकं विषयमधिकृत्य लिखत : 15

(I) महाभारतस्य कथावस्तु

(II) गीतिकाव्यानि

(III) भासनाटकचक्रम्।

(ब) अधोलिखितेषु विषयद्वयमधिकृत्य लिखत : 10

(I) क्षेमेन्द्रः

(II) चाणक्यनीतिः

(III) कलिविडम्बना

(IV) भारविः।